
ஸ்ரீ:

# ஸ்ரீ பண்டரீபுர க்ஷேத்திர மகாத்ம்யமும் ஸ்ரீ விட்டல ஸ்தோத்திரங்களும்



ஸ்ரீ பண்டரீநாதர் (விட்டோபா) பண்டரீபுரம்

தொகுப்பு கருத்துரை


ஸ்ரீமதி விஷ்ணுபிரியாசாரியார்

ஸ்ரீ:

# ஸ்ரீ பண்டரீபுர க்ஷேத்திர மகாத்ம்யமும்
# ஸ்ரீ விட்டல ஸ்தோத்திரங்களும்
## (புராணங்களினின்று)


தொகுப்பு கருத்துரை

ஸ்ரீமதி விஷ்ணுபிரியாசாரியார்




வெளியீடு

ஸ்ரீ லக்ஷ்மி ஸரஸ் மாருதி ட்ரஸ்ட்

ராமகிருஷ்ணா நகர், புதுச்சேரி - 1.

போன் : 0143 - 2260096

श्रीमते लक्ष्मी हयवदन परब्रह्मणे नमः
श्रीमते निगमान्त महोदशिकय नमः
श्री सुन्दर तातयार्य महागुरवे नमः

## முன்னுரை

எம்பெருமான் புண்ணிய பூமியாகிய நம் பாரத தேசத்தில் விபவ அவதாரங்கள் எடுத்து தமது ரக்ஷண வியாபாரத்தை நிர்வகித்து ஸாதுக்களை பரிரக்ஷணம் செய்தாற்போல், அர்ச்சாரூபமாக கலியுகத்தில் கோயில், திருமலை, பெருமாள் கோயில் உள்ளிட்ட 108 திவ்ய தேசங்கள், அபிமான ஸ்தலங்கள் அனந்தானந்தமாக எங்கெங்கும் பரம ஸான்னித்யத்துடன் எழுந்தருளியிருந்து பாவங்கள் மலிந்து, நல்லன பின்னடைந்து வரும் காலத்திலும் எப்பேற்பட்ட மகாபாபி கூட உய்வடைந்து போகட்டும் என்கிற கருணாமூர்த்தியாக ஸேவை ஸாதித்து வருகிறார். இவற்றுள் வடதேசத்தில் பீமநதி நதிக்கரையில் அமைந்துள்ள பண்டரீபுரம் சில காலமாக மிக பிரஸித்தமானது. அன்னையும், பிதாவும் முன்னறி தெய்வம் என்பதை வழக்கில் அனுசரித்துக் காட்டிய புண்டரீகனுக்கு காட்சி தந்தருளி அவன் காட்டிய செங்கல் மீது ருக்மிணி பிராட்டியும் தாமும் இன்னும் ஸேவை ஸாதித்து வருகிறான் கண்ணன். அங்கு விட்டலன் என்கிற திருநாமம் கொண்டு அனேகானேக பக்தர்கள் வாழ்வில் அற்புதங்களை நிகழ்த்திக் காட்டிய எளிமை ஸௌசீல்யாதி குணங்களைப் பற்றி ஸ்ரீ மஹா பக்த விஜயம் என்கிற நூல் விவரித்துக் கூறும். ஸ்ரீ விட்டலனுடைய நாம ஸங்கீர்த்தனம் அனவிரதமும் கேட்கப்படும் பண்டரீபுரத்தில் ஸாக்ஷாத் கண்ணன் அர்ச்சை என்கிற உருவில் விபவ ஸ்வரூபமாகவே நித்ய ஸான்னித்தியம் கொண்டு பரிபாலித்து வருகிறார் என்பதில் சந்தேகமில்லை. ஸ்ரீ விட்டலனைப் பற்றிய பௌராணிகமான மூன்று ஸ்தோத்திரங்கள் இங்கு வெளியிடப்படுகின்றன. ஸ்ரீ விட்டலனுடைய கருணை மழை பொழிந்து கொண்டே தான் இருக்கிறது. கையேந்தி லாபமடைவது நமது கடமை.

**ஸ்ரீ மதி விஷ்ணுபிரியாசார்**
புதுச்சேரி

# भूमिका

हमारा भारत देश महान है कि सारे भूगोल में यही एक देश कर्म भुमि कहलाता है । इस भारत भूमि की महिमा अपार है, इसी पुण्य भूमि में श्रीमन् नारायण परतत्व रूवरूपी भगकान ने कई अवतार लिए हैं । दुष्ट निग्रह शिष्ट परिपालन का निर्वाह करके अपनी दया का । यत्र तत्र आभास दिखाया है । महर्षियों, मुनिवरों आलवारादि आचार्यवर्यों का प्राहुर्भाव हुआ है । एवं अमूलय सेवा रूप अनकी दिव्य सूकियों की स्वना यहीं हुई है, ऐसे अपार अगाध, अपरिमित, अद्वितीय, अमूल्य ऐश्वार्यों की निधि इसी भारत की गौरव शिला वनी है, भले ही कलियुग के अन्त में ही भत्रावान कलिक अवतार लेनेवाले हों पर भारत देश भर विग्रहरूप धारण किये हए मन्दिरों में उनका साक्षात् निवास का अनुभन भतजन पा रहे हैं । साधु सन्त महान पुरूषों के जीवन में, आज भी हमें सोचते हुए रोमांचित कर देनेवाली अत्यद्भुत धठनाओं के होते सुना है । पढ़ा है । उतर भारत के ऐसे महान क्षेत्रों में भीमरथी तटपर स्थ्ति पण्डरपुर क्षेत्र की महिमा वाचामगोचर है । विटुलजी के नामसं कीर्व्रन की महिया से रूक्माई समेत श्री विद्वलजी का दिव्य सान्निध्य दिन प्रति दिन बढ़ता जा रहा है । स्वयं भगवान ने इस क्षेत्र की महिमा गायी है । श्री पद्म पुराण श्री भविष्योत्तर पुराण इत्याहि में निहित तीन स्तोत्र रत्नों को इस पुस्तक में मुद्रित किया है । भगवान की कूपा वर्षा तो सदैव ही भर्फो की तरफ प्रवहित होती ही रहती है, वह अविछिधन्न प्रवाह है । अपनी हथेली में पा लेना मात्र भत्र का कर्तव्य है । स्तोमों का पठन करनेवाले श्रद्धापूरित जन अवश्य ही सर्वत्र विजयी बनेंगे । अरोग ढ़गात्र संपन्न दीर्धापुष्मान होंगे, सपप्विार सुरवी हो अन्त में मोंक्ष के भी भागी बन जाएँगे, हसमें कोई सन्देह नहीं है ।

इति विनीत बहन

श्रीमती विष्णुप्रिया चारी

ஶ்ரீ:

# ஸ்ரீ பத்ம புராணாந்தர்கத
# ஸ்ரீபாண்டுரங்க கவசம்

(ஸ்ரீ பாண்டுரங்க மூலமந்திரம் கொண்டது)

ஸூத உவாச –

1. சிரோ மே விட்டல பாது கபோலம் முத்கர பிரிய : ।
நேத்ரயோ விஷ்ணு ரூபிச வைகுண்டோ பிராணமேவச ।।

2. முனிஸேவ்யோ முகம் பாது தந்தபங்க்திம் ஸுரேச்வர : ।
வித்யாதீசஸ்து மேஜிஹ்வாம் கண்டம் விச்வேச வந்தித : ।।

3. வியாபகோ ஹ்ருதயம் பாது ஸ்கந்தௌ பாது ஸுகபிரத : ।
புஜௌ மே நிருஹரி : பாது கரௌச ஸுரநாயக : ।।

4. மத்யம் பாது ஸுராதீசோ நாபிம் பாது ஸுராலய : ।
ஸுரவந்த்ய : கடீ பாது ஜானுனீ கமலாஸன : ।।

5. ஜங்கே பாது ஹ்ருஷீகேச பாதௌ பாது திரிவிக்ரம : ।
நிகிலம் ச சரீரம் மே பாதாம் கோவிந்த மாதவௌ ।।

6. அகாரோ வியாபகோ விஷ்ணு ரக்ஷராத்மக ஏவச ।
பாவக : ஸர்வபாபா நாமகாராய நமோ நம : ।।

7. தாரக ஸர்வ பூதானாம் தர்மசாஸ்த்ரேஷு கீயதே ।
புனாது விச்வபுவனம் தம் ஓங்காராய நமோ நம : ।।

8. மூலபிரகிருதி ரூபாய மஹாமாயா ச வைஷ்ணவி ।
தஸ்யா பீஜேன ஸம்யுக்தயகாராய நமோ நம : ।।

9. வைகுண்டாதிபதி : ஸாக்ஷாத் வைகுண்ட தாயக : ।
வைஜயந்தீ ஸமாயுக்தோ விகாராய நமோ நம : ।।

10. ஸ்ராத : ஸர்வேஷ் தீர்த்தேஷு பூதோ யஞ்ஞாதி கர்மஸு ।
பாவனோ த்விஜபங்கீனாம் ட²காராய நமோ நம : ।।

11. வாஹனம் கருடோ யஸ்ய புஜங்க சயனம் ததா ।
வாமபாகே ச லக்ஷ்மீஸ்ச லகாராய நமோ நம : ।।

12. நாதராதி ஸமாயுக்தம் வைஷ்ணவம் பரமம் பதம் ।
லபதே மானவோ நித்யம் வைஷ்ணவம் தர்மமாச்ரித : ।।

13. வியாதயோ விலயம் யாந்தி பூர்வகர்ம ஸமுத்பவா : ।
பூதானிச பலாயந்தே மந்த்ரோபாஸக தர்சனாத் ।।

14. இதம் ஷடக்ஷர ஸ்தோத்ரம் யோ ஜபேத் ச்ரத்யாந் வித : ।
விஷ்ணோ : ஸாயுஜ்ய மாப்னோதி ஸத்யம் ஸத்யம் ந சம்சய : ।।



# ஸ்ரீ விட்டல ஸ்தவ ராஜ :

ஓம் அஸ்ய ஸ்ரீ விட்டல ஸ்தவ ராஜ ஸ்தோத்ர மஹாமந்த்ரஸ்ய பகவாந் வேத வியாஸ மகரிஷி : । அதிஜகதீ சந்த : । ஸ்ரீ விட்டல பரமாத்மா தேவதா । திரி மூர்த்யாத் மக இதி பீஜம் । ஸ்ருஷ்டி ஸம் ரக்ஷணார்த்தம் இதி சக்தி : । வரதாபய ஹஸ்த இதி கீலகம் । மம ஸர்வாபீஷ்ட பலஸித்யர்த்தே ஜபே விநியோக : ।

அத நியாஸ : ।

ஓம் நமோ விட்டலாய அங்குஷ்டாப்யாம் நம :

ஓம் தத்வ பிரகாசாத்மனே தர்ஜனீப்யாம் நம :

ஓம் சங்க சக்ர கதா தராத்மனே மத்யமாம்யாம் நம :

ஓம் ஸ்ருஷ்டி ஸம்ரக்ஷணார்த்தாய அநாமிகாப்யாம் நம :

ஓம் திரிமூர்த்யாத்மக கனிஷ்டிகாப்யாம் நம:

ஓம் வரதாபய ஹஸ்தாய கரதல கரபிருஷ்டாப்யாம் நம:

ஏவம் ஹ்ருதயாதி நியாஸ : பூர்புவஸுவரோ மிதி திக்பந்த : ।।

## தியானம்

1. ஸ்ரீ குரும் விட்டலானந்தம் பராத்பர ஜகத் பிரபும் ।
திரைலோக்ய வியாபகம் தேவம் சுத்தமத்யந்த நிர்மலம் ।।

2. நாஸாக்ரேவஸ்தித்ம தேவம் ஆப்ரஹ்ம ஸ்தம்ப ஸம்யுதம் ।
ஊர்ணா தந்து நிபாகரம் ஸுத்ரஞ்ஞும் விட்டலம் ஸ்வயம் ।।

3. கங்கா யமுனயோர் மத்யே திரிகூடம் ரங்க மந்திரம் ।
ஞானம் பீமநதீ தீரம் ஸ்வதேவம் பண்டரீபுரம் ।।

4. ருக்மிணீ சக்தி ஹஸ்தேன கிரீடந்தம் சலலோசனம் ।
ஆஞ்ஞா பிரம்மபிலாந்தஸ்த ஜ்யோதிர்மய ஸ்வரூபகம் ।।

5. ஸஹஸ்ர தல பத்மஸ்தம் ஸர்வாபரண பூஷிதம் ।
ஸர்வ தேவ ஸமுத்பன்னம் ஓமிதி ஜ்யோதி ரூபகம் ।।

6. ஸம பர்வத ஊர்த்வஸ்தம் ச்ரோணி திரய ஸஹஸ்ரகம் ।
ஸ்தம்போ மத்யம் யதாஸ்தானம் கலௌ வேங்கடநாயகம் ।।

7. பீத வஸ்த்ர பரிதானம் துளசி வனமாலினம் ।
சங்க சக்ர தரம் தேவம் வரதாபய ஹஸ்தகம் ।।

8. ஊர்த்வ புண்ட்ரமயம் தேவம் ஸுவர்ண மகுடோஜ்வலம் ।
ரத்ன ஸிம் ஹாஸனம் தேவம் சித்ராபரண பூஷிதம் ।।

9. ரத்ன கிங்கிணீக கேயூரம் ரத்னமண்டல சோபிதம் ।
பௌண்ட்ரச பாலினம் ரங்கம் யதூனாம் குலதீபகம் ।।

10. தேவாரி தைத்ய தர்பக்னம் ஸர்வ லோகைக நாயகம் ।
ஓம் நம : சாந்தி ரூபாய விட்டலாய நமோ நம : ।।

11. ஸர்வதேவ ஸ்வரூபாய ஸர்வ யந்த்ர ஸ்வரூபிணே ।
ஸர்வதந்த்ர ஸ்வரூபாய விட்டலாய நமோ நம : ।।

12. பரமந்த்ர பிரணாசாய பரயந்த்ர நிவாரிணே ।
பரதந்த்ர விநாசாய விட்டலாய நமோ நம : ।।

13. பராத்பர ஸ்வரூபாய பரமாத்ம ஸ்வரூபிணே ।
பரப்ரஹ்ம ஸ்வரூபாய விட்டலாய நமோ நம : ।।

14. விச்வரூப ஸ்வரூபாய விச்வவியாபி ஸ்வரூபிணே ।
விச்வம்பர ஸ்வமித்ராய விட்டாலய நமோ நம : ।।

15. பரமஹம்ஸ ஸ்வரூபாய ஸோஹம் ஹம் ஸ ரூபிணே ।
ஹம்ஸ மந்த்ர ஸ்வரூபாய விட்டலாய நமோ நம : ।।

16. அதிர்வாச்ய ஸ்வரூபாய அகண்ட பிரம்ம ரூபிணே ।
ஆத்ம தத்வ பிரகாசாய விட்டலாய நமோ நம : ।।

17. க்ஷராக்ஷர ஸ்வரூபாய அக்ஷராய ஸ்வரூபிணே ।
ஓங்கார வாச்ய ரூபாய விட்டலாய நமோ நம : ।।

18. பிந்து நாத கலா தீத பின்ன தேஹ ஸமபிரப ।
அபின்னாய விச்வாய விட்டலாய நமோ நம : ।।

19. பீமாதீர நிவாஸாய பண்டரீபுர வாஸிநே ।
பாண்டுரங்க பிரகாசாய விட்டலாய நமோ நம : ।।

20. ஸர்வயோகார்த்த தத்வஞ்ஞ ஸர்வபூத ஹிதே ரத ।
ஸர்வ லோகஹிதார்த்தாய விட்டலாய நமோ நம : ।।

21. யஇதம் படதே நித்யம் திரிஸந்த்யம் ஸ்தௌதி மாதவம் ।
ஸர்வயோக பிரதம் நித்யம் தீர்க்கமாயுஷ்ய வர்தனம் ।।

22. ஸர்வே ஜ்வரா விநச்யந்தி முச்யதே ஸர்வ பந்தனாத் ।
ஆவர்த்தன ஸஹஸ்ராது லபதே வாஞ்சிதம் பலம் ।।

23. யஇதம் பரமம் குஹ்யம் ஸர்வத்ர நபிரகாசயேத் ।
ஸபிரம்ம ஞான மாப்னோதி புக்திம் முக்திம் ச விந்ததி ।।

24. ஸர்வபூத பிரசமனம் ஸர்வ துக்க நிவாரணம் ।
ஸர்வ அபமிருத்யு பிரசமனம் ஸர்வராஜ வசீகரம் ।।

25. திரிஸந்த்யம் படதே பக்த்யா நிர்பயோ பவதி த்ருவம் ।।

26. ஸங்க்ராமே ஸங்கடே சைவ விவாதே சத்ருமத்யகே ।
ச்ருங்கலா பந்தனே சைவ முச்யதே ஸர்வகில்பிஷாத் ।।

27. ராஜத்வாரே ஸபாஸ்தானே ஸிம்ஹ வியாக்ர பயேஷுச ।
ஸாதக ஸ்தம்பனே சைவ ஸர்வத்ர விஜயீபவேத் ।।

# ஸ்ரீ பவிஷ்யோத்தர புராண
# அந்தர்கத ஸ்ரீ விட்டல மஹாத்மியம்

## ஸ்ரீ பார்வத்யுவாச :

1. மஹாசம்போ தேவதேவ பக்தாநுக்ரஹ காரக ।
ஸ்ரீ விட்டலாக்யம் ஹ்ருதயம் தந்மே ப்ரூஹி ஸதாசிவ ॥

## ஸ்ரீ சங்கர உவாச :

2. ச்ருணு தேவி மஹாதேவி பார்வதி பிராணவல்லபே ।
குஹ்யாத் குஹ்யதரம் ச்ரேஷ்டம் நாஸ்திகுஹ்யமத : பரம் ॥

3. ஜீவஸ்ய ஜீவனம் ஸாக்ஷாத் பிராணினாம் பிராண உச்யதே ।
யோகினாம் ஹி மஹாகம்யம் பாண்டு ரங்காபிதானகம் ॥

4. அத்யாபி மஹிமா தஸ்ய ஸர்வதா ஞாயதே நஹி ।
நித்ய நூதன க்ஷேத்ரஸ்யோ பமா நாஸ்தி நிஸ்சிதம் ॥

5. முகம் கஞ்ஜேன துலிதம் பத்ம பத்ர ஸமேக்ஷணம் ।
கதம் ஸாம்யம் பவேத் தேவி ஹி அந்தரம் மதந்தரம் ॥

6. காச்யா சதகுணம் ச்ரேஷ்டம் த்வாரவத்யா திவிலக்ஷயோ ।
ஏவம் ஸர்வாணி தீர்த்தானி கலாம் நார்ஹந்தி கானிசித் ॥

7. தீர்த்தம் க்ஷேத்திரம் தைவதம் சமந்த்ர : ஸ்தோத்ரம் மஹாத்புதம் ।
ஏதத் ஸர்வம் யதா சக்த்யா வர்ணயாமி மம பிரியே ॥

8. ஏகதா சஹ்ஸ்ர ஸம்ஸ்தானே தேவதேவம் ஜகத்குரும் ।
கதோஹம் பாதபூஜார்த்தம் ஸுரேந்திர பிராம்மணை : ஸஹ ॥

9. சேஷ நாரத பக்ஷீந்திரைர் லக்ஷ்மிகாந்தம் கணை : ஸஹ ।
பிரணம்ய பரமாத்மானம் தமுவாச சதுர்முக : ।।

## பிரம்மோவாச :

10. மஹாவிஷ்ணோ ஜகந்நாத ஸர்வ விச்வ குஹாசய ।
தவ யச்ச பிரியம் தேவ ஸம்ஸ்தானம் ப்ரூஹிகேசவ ।।

## ஸ்ரீ பகவானுவாச :

1. ச்ருணு பிரம்மன் மஹாசம்போ அதிஷ்டானம் மமாலயம் ।
பாண்டுரங்க மிதி கியாதம் நஸாம்யம் புவனச்ரயே : ।।

2. பாண்டுரங்கம் ச வைகுண்டம் துலயித்வா மயாதுனா ।
பாண்டுரங்கம் குரும்மத்வா பூர்ணத்வேனா
ஸ்திதோஸ்மியஹம் : ।।

3. நாஹம் திஷ்டாமி க்ஷீராப்தௌ நாஸ்மி ஸூர்யேந்துமண்டலே ।
மந்நாம கீர்த்தன ஸ்தானே தத்ர திஷ்டாமி சங்கர : ।।

4. கார்ய காரண கர்த்ருத்வே ஸம்பவக்ஷேத்ர முச்யதே ।
தாத்ருசம் நாஸ்தி தத்க்ஷேத்ரம் யத்ர திஷ்டாமி ஸர்வதா ।।

5. ஸூகே ஸஞ்ஜயதி பிரம்ம பிரம்மபீஜம் பிரசஸ்யதே ।
பீஜேன வியஜ்யதே பிந்துர் பிந்தோர்நாத : பிரகீர்த்தித : ।।

6. ஆஹதோ நாஹதோஸ்சோதி த்விதா நாதஸ்து வித்யதே ।
ஓங்காரோ நாஹதோ மூர்த்திராஹதோ நாமகீர்த்தனம் : ।।

7. பிந்து நாதாத்மகம் க்ஷேத்திரம் நாதோ வியக்த பிரதிருச்யதே ।
யத்ர ஸங்கீர்த்தனேனைவ ஸாக்ஷாத் பிரம்ம மயோ பவேத் ।।

8. கீத்ருசம் த்ருதவாந் ரூபமித்யாஹ பரமேச்வர : ।
இஷ்டிகாயாம் ஸமபதம் தத்வமஸ்யாதி லக்ஷணம் ।।

9. கடிவிந்யஸ்த ஹஸ்தாப் ஜம் பிரணவாகிருதி ஸௌரஸம் ।
ஊர்த்வ பீஜ ஸமாக்யாதம் பூர்ணேந்து முகமண்டலம் ।।

10. ஸர்வ பூஷண சோபாட்ய மீத்ருசம் மோக்ஷதம் ந்ருணாம் ।
அஞ்ஞானஜன போதார்த்தம் திஷ்டாமீஹ ஜனார்தன ।।

11. விட்டல : பரமோ தேவத்ரயீரூபேண திஷ்டதி ।
தீர்த்தம் க்ஷேத்திரம் ததா தேவோ பிரமம் பிரம்மவிதாம் வர ।।

12. குஹ்யாத் குஹ்யதரம் தேவம் க்ஷேத்ராணாம் க்ஷேத்ரமுத்தமம் ।
சந்திரபாகாவரம் தீர்த்தம் ந பூதம் ந பவிஷ்யதி ।।

13. இதி ச்ருத்வா ரமேசஸ்ய வசனம் பரமாத்புதம் ।
பிரம்ம நாரத ஸம்யுக்தோ ஹ்ருதயம் கீர்த்தயன் யயௌ ।।

14. இதம் விட்டல ஹ்ருதயம் ஸர்வ தாரித்திரிய நாசனம் ।
ஸக்ருத் படன மாத்ரேண லபதே பரமம் பதம் ।।

15. **ஓமஸ்ய ஹ்ருதய மந்த்ரஸ்ய பிரம்மரிஷி : ஸ்மிருத ।**
**சந்தோனுஷ்டுப் பிரவிக்யாதோ தேவ : ஸ்ரீ விட்டலோ மஹ : ।।**

16. **ஓம் நமோ பீஜ மக்யாதம் ஸ்ரீம் பாது சக்தி ரீடிதா ।**
**ஓம் ஸ்ரீம் க்லீம் கீலகம் யஸ்ய வேதகோ தேவவிட்டல : ।।**

17. **திரிபீஜைரங்குலி ந்யாஸ : ஷடங்கானி தத : பரம் ।**
**தியானாதிகம் மஹாதிவியம் ஹ்ருதயம் ஹ்ருதயே ஸ்மரேத் ।।**

ஓம் அஸ்ய ஶ்ரீ விட்டலஹ்ருதய ஸ்தோத்ரமந்த்ரஸ்ய பரபிரம்மரிஷி : அனுஷ்டுப்சந்த : ஶ்ரீ விட்டல : பரமாத்மா தேவதா । ஓம் நம இதி பீஜம் ஓம் ஶ்ரீ ம் சக்தி । ஓம் ஶ்ரீம் க்லீம் கீலகம் । ஓம் ஶ்ரீ விட்டலோ வேதக : । ஶ்ரீ விட்டல பிரீத்யர்த்தே ஜபே விநியோக । ஓம் ஶ்ரீம் க்லீம் அங்குல்யாதி ஷடாங்கநியாஸ :

## ஶ்ரீஅத தியானம்

18. ஓம் ஶ்ரீம் க்லீம் விரஹஸித முகசந்திரம் ப்ரோல்லஸத்பூர்ண பிம்மம் ।

பிரணமதபய ஹஸ்தம் சாருநீலாம்புதாபம் ।
ஸமபதகமனீயம் தத்வ போதாவ கம்யம் ।
ஸதயவரதேவம் விட்டலம் தம் நமாமி ।।

## க்லீம் ஶ்ரீம் ஓம் ஓம் ஶ்ரீம் க்லீம் ।।

19. பாண்டுரங்க சிகாம் பாது மூர்த்தானம் பாது விட்டல : ।
மஸ்தகம் மாதவ : பாது திலகம் பாது ஶ்ரீகர : ।।

20. பர்க : பாது ப்ருவோர்மத்யே லோசனே விஷ்ணுரோஜஸா ।
திருஷ்டிம் ஸுதர்சன : பாது ச்ரோதே பாது திகம்பர : ।।

21. நாஸாக்ரம் திருஷ்டி ஸௌந்தர்ய ஓஷ்டௌபாது ஸுதார்ணவ : ।
தந்தாந்தயாநிதி : பாது ஜிஹ்வாம் மே தேவ வல்லப : ।।

22. தாலு தேசம் ஹரி : பாது ரஸனாம் கோரஸபிரிய : ।
சிபுகம் சின்மய : பாது கிரீவாம் மே கருடத்வஜ : ।।

23. கண்டம் து கம்புகண்ட ச ஸகந்தௌ பாது மஹாபல : ।
புஜௌ கிரிதர : பாது பாஹூமே மதுஸூதன : ।।

24. கூர்பரௌ கிருபயாவிஷ்ட : கரௌ மே கமலபதி : ।
அங்குலீரச்யுத : பாது நகானீ நரகேஸரீ ।।

25. வக்ஷ : ஸ்ரீலாஞ்சன பாது ஸ்தனௌ மே ஸ்தனலாலஸ : ।
ஹ்ருதயம் ஸ்ரீ ஹ்ருஷீகேச உதரம் பரமாமிருத : ।।

26. நாபிம்மே பத்ம நாபஸ்ச குக்ஷிம் பிரம்மாண்ட நாயக : ।
கடிம் பாது கடிகரோ ஜகனம் து ஜனார்தன : ।।

27. சிச்னம் பாது ஸ்மராதீசோ விருஷபோ விருஷப : பதி ।
குஹ்யம் குஹ்யதர பாது ஊரூ பாதூரூ விக்ரம : ।।

28. ஜானூபாது ஜகந்நாதோ ஜங்கேமே மனமோஹன : ।
குல்பௌ பாது குணாதீச : பாதௌ பாது திரிவிக்ரம : ।।

29. சரீரம் சாகிலம் பாது நரநாராயணோ ஹரி : ।
அக்ரே ஹிஅக்ரதர பாது தக்ஷிணே தக்ஷகபிரிய : ।।

30. பிருஷ்டே புஷ்டிகர : பாது வாமே மே வாஸவபிரபு : ।
பூர்வே பூர்வபர : பாது ஆக்னேயாம் ச அக்னிரக்ஷக : ।।

31. தக்ஷிணே தீக்ஷிதார்த்தஸ்ச நைர்ருத்யாம் அம்ருத நாயக : ।
பஸ்சிமே வருணாதீசோ வாயவ்யே வாதஜாபதி : ।।

32. உத்தரே திருடகட்கஸ்ச ஈசாந்யே பாது ஈச்வர : ।
உபரிஷ்டாது பகவாந் அந்தரிக்ஷே சிதம்பர : ।।

33. பூதலே தரணிநாயக : பாதாளே கூர்ம நாயக : ।
ஸ்வர்கே பாது ஸுரேந்திரோ பிரம்மாண்டே பிரம்மணஸ்பதி : ।।

34. அடவ்யாம் நிருஹரி : பாது ஜீவனே விச்வ ஜீவன : ।
மார்கே பாது மனோகம்ய : ஸ்தானே பாது ஸ்திராஸன : ।।

35. ஸ பாஹ்யாப்யந்தரம் பாது புண்டரீகவர பிரிய : ।
விஷ்ணுர்மே விஷயாந் பாது வாஸனா : பாது வாமன : ।।

36. கர்த்தா கர்மேந்திரியம் பாது ஞாதா ஞானேந்திரியம் ஸதா ।
பிராணாந் பாது பிராணநாத ஆத்மராமோ மனாதிஷ ।।

37. ஜாக்ருதிம் மே ஜகத்பிரம்ம ஸ்வப்னம் பாது ஸுதேஜக : ।
ஸுஷீப்திம் மே ஸமாதீசஸ்துர்யாம் பாது முனிபிரிய : ।।

38. பார்யாம் பாது ரமாகாந்த : புத்ரான் பாது பிரஜாநிதி : ।
கன்யாம் மே கருணாநாதோ பாந்தவான் பக்தவத்ஸல : ।।

39. தனம் பாது தனாத்யக்ஷோ தான்யம் விச்வ குடும்பக : ।
பசூந்மே பாலக : பாது வித்யாம் பாது கலாநிதி : ।।

40. வாசஸ்பதி : பாதுவாதே ஸபாயாம் விச்வமோஹன : ।
காமக்ரோதோத் பவத் பாது பூர்ணகாமோ மனோரம : ।।

41. வஸ்த்ரம் ரத்னம் பூஷணம் ச நாம ரூபம் குலம் கிருஹம் ।
ஸர்வம் ஸர்வாத்மக : பாது சுத்தபிரம்ம பராத்பர : ।।
க்லீம் ஸ்ரீம் ஓம் ஓம் ஸ்ரீம் க்லீம் ।

42. விட்டலம் மூர்த்தனி விந்யஸ்ய லலாடம் ஸ்ரீகரம் நியஸேத் ।
பாண்டுரங்கம் ப்ருவோர்மத்யே நேத்ரயோர்வியாபகம்
நியஸேத் ।।

43. கர்ணயோதிர் கமார்த்தம் ச கல்லயோர் வல்லபம் நியஸேத் ।
நாஸிகாயாம் நியஸேத் கிருஷ்ணம் முகேவை மாதவம்
நியஸேத் ।।

44. ஓஷ்டயோர் முரளீகாந்தம் தந்தபங்க்த்யாம் ஸுஹாஸகம் ।
ரஸனாயாம் ரஸாதீசம் ஜிஹ்வாக்ரே கீர்த்தனம் நியஸேத் ।।

45. கண்டே நியஸேத் மஹாவிஷ்ணும் ஸ்கந்தயோ : கமலாபதிம் ।
பாஹ்வோர் பலாநுஜம் நியஸ்ய கரே சக்ரதரம் நியஸேத் ।।

46. பாணிதலே பத்மதரம் கராக்ரே வரதாபயம் ।
வக்ஷ : ஸ்தலே வரேண்யம் சஹ்ருதயே ஸ்ரீ ஹரிம் நியஸேத் ।।

49. உதரே விச்வ பர்த்தாரம் நாபௌ நாபிகரம் நியஸேத் ।
கட்யாம் நியஸேத் கிரியாதீத மூரௌ து உத்தவ பிரியம் ।।

48. ஜானுத்வயே நியஸேத்சக்திம் பாதயோ : பாவனம் நியஸேத் ।
ஸபாஹ்யாப்யந்தரம் நியஸ்ய தேவதேவம் ஜகத்குரும் க்லீம் ।।
ஸ்ரீம் ஓம் ஓம் ஸ்ரீம் க்லீம் ।।

49. விட்டலாய நம ஸ்துப்யம் நமோ விஞ்ஞான ஹேதவே ।
விஷ்ணு ஜிஷ்ணு ஸ்வரூபாய ஸ்ரீ விஷ்ணவே நமோ நம : ।।

50. நம : புண்ரீகாக்ஷாய பூர்ண பிம்பாத்மனே நம : ।
நமஸ்தே பாண்டுரங்காய பாவனாய நமோ நம : ।।

51. நம : பூர்ணபிரகாசாய நமஸ்தே பூர்ண தேஜஸே : ।
பூர்ணாச்வர்ய ஸ்வரூபாய பூர்ண ஞானாத்மனே நம : ।।

52. ஸச்சிதானந்த கந்தாய நமோனந்த ஸுகாத்மனே ।

நமோ னந்தாய சாந்தாய ஸ்ரீராமாய நமோ நம : ||

53. நமோ ஜ்யோதி ஸ்வரூபாய நமோ ஜ்யோதிர்மயாத்மனே |
நமோ ஜ்யோதி பிரகாசாய ஸர்வோத்கிருஷ்டாத்மனே நம : ||

54. ஓம் நமோ பிரம்மரூபாய நம ஓங்கார மூர்த்தயே |
நிர்விகல்பாய ஸத்யாய சுத்தஸத்வாத்மனே நம : ||

55. மஹத் பிரம்ம நமஸ்தேஸ்து ஸத்ய ஸங்கல்ப ஹேதவே |
நம : ஸ்ருஷ்டி பிரகாசாய குணஸாம்யாய தே நம : ||

56. பிரம்ம விஷ்ணு மஹேசாய நாதாவர்ணாத்ம ரூபிணே |
ஸதோதிதாய சுத்தாய குணாதீதாய தே நம : ||

57. நம : ஸஹஸ்ர நாம்னே ச நம : ஸஹஸ்ர ரூபிணே |
நம : ஸஹஸ்ர வக்த்ராய ஸஹஸ்ராக்ஷாய தே நம : ||

58. கேசவாய நமஸ்துப்யம் நமோ நாராயணய ச |
மாதவாய நமஸ்தேஸ்து கோவிந்தாய நமோ நம : ||

59. ஸ்ரீ விஷ்ணவே நமஸ்துப்யம் மதுஸூதன ரூபிணே |
திரிவிக்ரம் ஸூதீர்காய வாமனாய நமோ நம : ||

60. ஸ்ரீதராய நமஸ்துப்யம் ஹ்ருஷிகேசாய தே நம : |
நமஸ்தே பத்மநாபாய தாமோதராய தே நம : ||

61. நமஸ்தே ஸங்கர்ஷனாய வாஸூதேவாய தே நம : |
பிரயத்யும்னாய நமஸ்தேஸ்து அநிருத்தாய தே நம : ||

62. நம : புருஷோத்தமாய அதோக்ஷஜாய தே நமோ நம : |
நமஸ்தே நாரஸிம்ஹாய அச்யுதாய நமோ நம : ||

63. நமோ ஜனார்தனாயாஸ்து உபேந்திராய சதமோ நம : ।
ஸ்ரீஹரயே நமஸ்துப்யம் ஸ்ரீ கிருஷ்ணாய நமோ நம : ॥

64. நம : பண்டரீநாதாய பீமாதீர நிவாஸினே : ।
நமோ ரிஷபிரஸன்னாய வரதாய நமோ நம : ॥

65. இஷ்டிகாரூடரூபாய ஸமபாதாய தே நம : ।
கடிவிந்யஸ்த ஹஸ்தாய முக பிரம்மாத்மனே நம : ॥

66. நமஸ்தீர்த்த ஸ்வரூபாய க்ஷேத்ர ரூபாத்மனே நம : ।
நமோஸ்து மூர்த்தி மூர்த்தாய திரிமூர்த்தயே நமோ நம : ॥

67. நமஸ்தே பிந்து தீர்த்தாய நமோ மிருதேச்வராய ச : ।
நம : புஷ்கர தீர்த்தாய சந்திர பாகாயதே நம : ॥

68. நமஸ்தே ஜானுதேவாய தீராவத்யை நமோ நம : ।
நமஸ்தே புண்டரீகாய பீமரத்யை நமோ நம : ॥

69. முக்திகேச பிரவராய வேணுவாதாத்மனே நம : ।
நமஸ்தேனந்த பாகாய த்விபதயாய நமோ நம : ॥

70. நமோ கோவத்ஸ பாதாய கோபாலாய நமோ நம : ।
நமஸ்தே பத்ம தீர்த்தாய நர நாராயணாத்மனே : ॥

71. நமஸ்தே பித்ரு தீர்த்தாய லக்ஷ்மி தீர்த்தாய தே நம : ।
நமோஸ்து சங்க சக்ராய கதாபத்மாய தே நம : ॥

72. நமோ அச்வத்த நிருஸிம்ஹாய குண்டலாக்ய ஸ்வரூபிணே ।
நமஸ்தே க்ஷேத்ர பாலாய மஹாலிங்காய தே நம : ॥

73.நமஸ்தே ரங்கசாலாயநம : கீர்த்தன ரூபிணே ।
நமோ ருக்மிணி நாதாய மஹாமூர்த்யை நமோ நம : ।।

74.நமோ வைகுண்ட நாதாய நம : க்ஷீராப்தி சாயினே ।
ஸர்வ பிரம்ம நம்ஸ்துப்யம் நமஸ்தேஸ்து நமோ நம : ।।
க்லீம் ஸ்ரீம் ஓம் ।।

75.ஆத்யந்தே ஸம்புடீகிருத்ய பீஜைஸ்ச பிராணவல்லபே ।।

76.அஷ்டோத்திர சதம் மந்த்ராத் ஹ்ருதயம் நமனை : ஸஹ ।
அனன்யை கீர்த்திதம்யைஸ்ச தேஷாமாஞ்ஞாம் வஹாம்யஹம் ।।

77.யாவன்யஸ்ய யதா பாவோ யந்நாம நியாஸ பூர்வகம் ।
தாவதேவ ஹி விஞ்ஞானம் கதிதம் மதனுக்ரஹாத் ।।

## ஸ்ரீ சங்கர உவாச

78. இத்யுக்தம் வாஸுதேவோக்தம் கோப்யாத் கோப்யதரம் மஹத் ।
நித்யம் ஸங்கீர்த்தனம் யஸ்ய பிராப்த முக்திர் நசம்சய : ।।

79. இதம் குஹ்யம் ஹி ஹ்ருதயம் விட்டலஸ்ய மஹாத்புதம் ।
ச்ருணுயாத் சிரத்தயா யுக்தோ வைகுண்ட லபதே ரதிம் ।।

80. ஏவமுக்த்வா மஹாதேவ பார்வதிமனுகம்பயா ।
ஸமாதிஸ்தோ பவ : சம்பு ஸுஸ்மிதா கமலானன : ।

(இதி ப விஷ்யோத்தரபுராணே பாண்டுரங்க மஹாத்ம்ய :)



# विठ्ठलकवचम्



सूत उवाच ।

शिरो मे विठ्ठलः पातु कपोलं मुद्गरप्रियः ।
नेत्रयोर्विष्णुरूपी च वैकुण्ठो घ्राणमेव च ।। १

मुनिसेव्यो मुखं पातु दन्तपङ्क्तिं सुरेश्वरः ।
विद्याधीशस्तु मे जिह्वां कण्ठं विश्वेशवन्दितः ।। २

व्यापको हृदयं पातु स्कन्धौ पातु सुखप्रदः ।
भुजौ मे नृहरिः पातु करौ च सुरनायकः ।। ३

मध्यं पातु सुराधीशो नाभिं पातु सुरालयः ।
सुरवन्द्यः कटी पातु जानुनी कमलासनः ।। ४

जङ्घे पातु हृषीकेशः पादौ पातु त्रिविक्रमः ।
निखिलं च शरीरं मे पातां गोविन्दमाधवौ ।। ५

अकारो व्यापको विष्णुरक्षरात्मक एव च ।
पावकः सर्वपापानामकाराय नमो नमः ।। ६

तारकः सर्वभूतानां धर्मशास्त्रेषु गीयते ।
पुनातु विश्वभुवनं तोंकाराय नमो नमः ।। ७

मूलप्रकृतिरूपा या महामाया च वैष्णवी ।
तस्या बीजेन संयुक्तयकाराय नमो नमः ।। ८

वैकुण्ठाधिपतिः साक्षाद्वैकुण्ठपददायकः ।
वैजयन्तीसमायुक्तो विकाराय नमो नमः ।। ९

स्नातः सर्वेषु तीर्थेषु पूतो यज्ञादिकर्मसु ।
पावनो द्विजपङ्क्तीनां ठकाराय नमो नमः ।। १०

वाहनं गरुडो यस्य भुजङ्गः शयनं तथा ।
वामभागे च लक्ष्मीश्च लकाराय नमो नमः ।। ११

नादरादिसमायुक्तं वैष्णवं परमं पदम् ।
लभते मानवो नित्यं वैष्णवं धर्ममाश्रितः ।। १२

व्याधयो विलयं यान्ति पूर्वकर्मसमुद्भवाः ।
भूतानि च पलायन्ते मन्त्रोपासकदर्शनात् ।। १३

इदं षडक्षरस्तोत्रं यो जपेच्छ्रद्धयान्वितः ।
विष्णोः सायुज्यमाप्नोति सत्यं सत्यं न संशयः ।। १४

(श्रीपद्मपुराणे)

## विठ्ठलहृदयम्

श्रीपार्वत्युवाच ।

महाशम्भो देवदेव भक्तानुग्रहकारक ।
श्रीविठ्ठलाख्यं हृदयं तन्मे ब्रूहि सदाशिव ।। १

श्रीशंकर उवाच ।

शृणु देवि महादेवि पार्वति प्राणवल्लभे ।
गुह्याद्गुह्यतरं श्रेष्ठं नास्ति गुह्यमतः परम् ।। २

जीवस्य जीवनं साक्षात्प्राणिनां प्राण उच्यते ।
योगिनां हि महागम्यं पाण्डुरङ्गाभिधानकम् ।। ३

अद्यापि महिमा तस्य सर्वथा ज्ञायते न हि।
नित्यनूतनतत्क्षेत्रस्योपमा नास्ति निश्चितम्॥ ४

मुखं कञ्जेन तुलितं पद्मपत्रसमेक्षणम्।
कथं साम्यं भवेद्देवि ह्यन्तरं महदन्तरम्॥ ५

गजैरावतयोश्चैव अश्वोच्चैःश्रवसोस्तथा।
स्पर्शपाषाणयोश्चैव ह्यन्तरं महदन्तरम्॥ ६

काश्याः शतगुणं श्रेष्ठं द्वारवत्या द्विलक्षयोः।
एवं सर्वाणि तीर्थानि कलां नार्हन्ति कानिचित्॥ ७

तीर्थं क्षेत्रं दैवतं च मन्त्रः स्तोत्रं महाद्भुतम्।
एतत्सर्वं यथाशक्त्या वर्णयामि मम प्रिये॥ ८

एकदा क्षीरसंस्थाने देवदेवं जगद्गुरुम्।
गतोऽहं पादपूजार्थं सुरेन्द्रब्राह्मणैः सह॥ ९

शेषनारदपक्षीन्द्रैर्लक्ष्मीकान्तं गणैः सह।
प्रणम्य परमात्मानं तमुवाच चतुर्मुखः॥ १०

**ब्रह्मोवाच।**

**महाविष्णो जगन्नाथ सर्वविश्वगुहाशय।**
**तव यच्च प्रियं देव संस्थानं ब्रूहि केशव॥ ११**

**श्रीभगवानुवाच।**

**शृणु ब्रह्मन् महाशंभो अधिष्ठानं ममालयम्।**
**पाण्डुरङ्गमिति ख्यातं न साम्यं भुवनत्रये॥ १२**

**पाण्डुरङ्गं च वैकुण्ठं तुलयित्वा मयाऽधुना।**
**पाण्डुरङ्गं गुरुं मत्वा पूर्णत्वेनास्थितोऽस्म्यहम्॥ १३**

नाहं तिष्ठामि क्षीराब्धौ नास्मि सूर्येन्दुमण्डले।
मन्नामकीर्तनस्थाने तत्र तिष्ठामि शंकर ।। १४

कार्य कारणकर्तृत्वे संभवक्षेत्रमुच्यते ।
तादृशं नास्ति तत्क्षेत्रं यत्र तिष्ठामि सर्वदा ।। १५

सुखे संजयति ब्रह्म ब्रह्मबीजं प्रशास्यते ।
बीजेन व्यज्यते बिन्दुर्बिन्दोर्नादः प्रकीर्तितः ।। १६

आहतोऽनाहतश्चेति द्विधा नादस्तु विद्यते ।
ओंकारोऽनाहतो मूर्तिराहतो नामकीर्तनम् ।। १७

बिन्दुनादात्मकं क्षेत्रं नादोऽव्यक्तः प्रदृश्यते ।
यत्र संकीर्तनेनैव साक्षाद्ब्रह्ममयो भवेत् ।। १८

कीदृशं धृतवान् रूपमित्याह परमेश्वरः ।
इष्टिकायां समपदं तत्त्वमस्यादिलक्षणम् ।। १९

कटिविन्यस्तहस्ताब्जं प्रणवाकृतिसौरसम् ।
ऊर्ध्वबीजसमाख्यतं पूर्णेन्दुमुखमण्डनम् ।। २०

सर्वभूषणशोभाढ्यमीदृशं मोक्षदं नृणाम् ।
अज्ञानजनबोधार्थं तिष्ठामीह जनार्दनः ।। २१

विठ्ठलः परमो देवस्त्रयीरूपेण तिष्ठति ।
तीर्थं क्षेत्रं तथा देवो ब्रह्म ब्रह्मविदां वर ।। २२

गुह्याद्गुह्यतरं देवं क्षेत्राणां क्षेत्रमुत्तमम् ।
चन्द्रभागावरं तीर्थं न भूतं न भविष्यति ।। २३

इति श्रुत्वा रमेशस्य वचनं परमामृतम् ।
ब्रह्मा नारदसंयुक्तो हृदयं कीर्तयन् ययौ ।। २४

इदं विठ्ठलहृदयं सर्वदारिद्यनाशनम्।
सकृत्पठनमात्रेण लभते परमं पदम्।। २५

ओमस्य हृदयमन्त्रस्य परब्रह्म ऋषिः स्मृतः।
छन्दोऽनुष्टुप् प्रविख्यातो देवः श्रीविठ्ठलो महः।। २६

ओं नमो बीजमाख्यातं श्रीं पातु शक्तिरीडिता।
ओं श्रीं क्लीं कीलकं यस्य वेधको देवविठ्ठलः।। २७

त्रिबीजैरङ्गुलिन्यासः षडंगानि ततः परम्।
ध्यानादिकं महादिव्यं हृदयं हृदये स्मरेत्।। २८

ओं अस्य श्रीविठ्ठलहृदयस्तोत्रमंत्रस्य परब्रह्म ऋषिः। अनुष्टुप् छन्दः। श्रीविठ्ठलः परमात्मा देवता। ओं नम इति बीजम्। ओं श्रीं शक्तिः। ओं श्रीं क्लीं कीलकम्। ओं श्रीं विठ्ठलो वेधकः। श्रीविठ्ठलप्रीत्यर्थं जपे विनियोगः। ओं श्रीं क्लीं अंगुल्यादि-षडंगन्यासः।. अथ ध्यानम्

ओं श्रीं क्लीं प्रहसितमुखचन्द्रं प्रोल्लसत्पूर्णबिंबं
प्रणमदभयहस्तं चारुनीलांबुदाभम्।
समपदकमनीयं तत्त्वबोधावगम्यं
सदयवरददेवं विठ्ठलं तं नमामि।। २९

क्लीं श्रीं ओं ओं श्रीं क्लीम्।।

पांडुरंगः शिखां पातु मूर्धानं पातु विठ्ठलः।
मस्तकं माधवः पातु तिलकं पातु श्रीकरः।। ३०

भर्गः पातु भ्रुवोर्मध्ये लोचने विष्णुरोजसा।
दृष्टिं सुदर्शनः पातु श्रोत्रे पातु दिगंबरः।। ३१

नासाग्रं सृष्टिसौंदर्य ओष्ठौ पातु सुधार्णवः ।
दन्तान् दयानिधिः पातु जिह्वां मे वेदवल्लभः ।। ३२

तालुदेशं हरिः पातु रसनां गोरसाप्रियः ।
चिबुकं चिन्मयः पातु ग्रीवां मे गरुडध्वजः ।। ३३

कंठं तु कंबुकंठश्च स्कंधौ पातु महाबलः ।
भुजौ गिरिधरः पातु बाहू मे मधुसूदनः ।। ३४

कूर्परौ कृपयाविष्टः करौ मे कमलापतिः ।
अंगुलीरच्युतः पातु नखानि नरकेसरी ।। ३५

वक्षः श्रीलांछनः पातु स्तनौ मे स्तनलालसः ।
हृदयं श्रीहृषीकेश उदरं परमामृतः ।। ३६

नाभिं मे पद्मनाभश्च कुक्षिं ब्रह्मांडनायकः ।
कटिं पातु कटिकरो जघनं तु जनार्दनः ।। ३७

शिश्नं पातु स्मराधीशो वृषणे वृषभः पतिः ।
गुह्यं गुह्यतरः पातु ऊरू पातूरुविक्रमः ।। ३८

जानू पातु जगन्नाथो जंघे मे मनमोहनः ।
गुल्फौ पातु गणाधीशः पादौ पातु त्रिविक्रमः ।। ३९

शरीरं चाखिलं पातु नरनारायणो हरिः ।
अग्रे ह्यग्रतरः पातु दक्षिणे दक्षकप्रियः ।। ४०

पृष्ठे पुष्टिकरः पातु वामे मे वासवप्रभुः ।
पूर्वे पूर्वापरः पातु आग्नेय्यां चाग्निरक्षकः ।। ४१

दक्षिणे दीक्षितार्थश्च नैर्ऋत्यामृतुनायकः ।
पश्चिमे वरुणाधीशो वायव्ये वातजापतिः ।। ४२

उत्तरे धृतखड्गश्च ईशान्ये पातु ईश्वरः ।
उपरिष्टातु भगवानंतरिक्षे चिदंबरः ।। ४३

भूतले धरणीनाथः पाताले कूर्मनायकः ।
स्वर्गे पातु सुरेंद्रेन्द्रो ब्रह्मांडे ब्रह्मणस्पतिः ।। ४४

अटव्यां नृहरिः पातु जीवने विश्वजीवनः ।
मार्गे पातु मनोगम्यः स्थाने पातु स्थिरासनः ।। ४५

सबाह्याभ्यन्तरं पातु पुंडरीकवरप्रियः ।
विष्णुर्मे विषयान् पातु वासनाः पातु वामनः ।। ४६

कर्ता कर्मेन्द्रियं पातु ज्ञाता ज्ञानेन्द्रियं सदा ।
प्राणान् पातु प्राणनाथ आत्मरामो मनादिषु ।। ४७

जागृतिं मे जगद्ब्रह्म स्वप्नं पातु सुतेजकः ।
सुषुप्तिं मे समाधीशस्तुर्यां पातु मुनिप्रियः ।। ४८

भार्यां पातु रमाकांतः पुत्रान् पातु प्रजानिधिः ।
कन्यां मे करुणानाथो बान्धवान् भक्तवत्सलः ।। ४९

धनं पातु धनाध्यक्षो धान्यं विश्वकुटुम्बकः ।
पशून्मे पालकः पातु विद्यां पातु कलानिधिः ।। ५०

वाचस्पतिः पातु वादे सभायां विश्वमोहनः ।
कामक्रोधोद्भयात्पातु पूर्णकामो मनोरमः ।। ५१

वस्त्रं रत्नं भूषणं च नाम रूपं कुलं गृहम् ।
सर्वं सर्वात्मकः पातु शुद्धब्रह्मपरात्परः ।। ५२

क्लीं श्रीं ओं ओं श्रीं क्लीम् ।

विठ्ठलं मूर्ध्नि विन्यस्य ललाटे श्रीकरं न्यसेत् ।
पाण्डुरङ्गं भ्रुवोर्मध्ये नेत्रयोर्व्यापकं न्यसेत् ।। ५३

कर्णयोर्निर्गमार्थं च गल्लयोर्वल्लभं न्यसेत् ।
नासिकायां न्यसेत्कृष्णं मुखे वै माधवं न्यसेत् ।। ५४

ओष्ठयोर्मुरलीकान्तं दन्तपङ्क्त्यां सुहासकम् ।
रसनायां रसाधीशं जिह्वाग्रे कीर्तनं न्यसेत् ।। ५५

कण्ठे न्यसेन्महाविष्णुं स्कन्धयोः कमलापतिम् ।
बाह्वोर्बलानुजं न्यस्य करे चक्रधरं न्यसेत् ।। ५६

पाणितले पद्मधरं कराग्रे वरदाभयम् ।
वक्षःस्थले वरेण्यं च हृदये श्रीहरिं न्यसेत् ।। ५७

उदरे विश्वभर्तारं नाभौ नाभिकरं न्यसेत् ।
कट्यां न्यसेत्क्रियातीतमूरौ तु उद्धवप्रियम् ।। ५८

जानुद्वये न्यसेच्छक्तिं पादयोः पावनं न्यसेत् ।
सबाह्याभ्यन्तरं न्यस्य देवदेवं जगद्गुरुम् ।। ५९

क्लीं श्रीं ओं ओं श्रीं क्लीं ।

विठ्ठलाय नमस्तुभ्यं नमो विज्ञानहेतवे ।
विष्णुजिष्णुस्वरूपाय श्रीविष्णवे नमो नमः ।। ६०

नमः पुण्डरीकाक्षाय पूर्णबिम्बात्मने नमः ।
नमस्ते पाण्डुरङ्गाय पावनाय नमो नमः ।। ६१

नमः पूर्णप्रकाशाय नमस्ते पूर्णतेजसे ।
पूर्णैश्वर्यस्वरूपाय पूर्णज्ञानात्मने नमः ।। ६२

सच्चिदानन्दकन्दाय नमोऽनन्तसुखात्मने ।
नमोऽनन्ताय शान्ताय श्रीरामाय नमो नमः ।। ६३

नमो ज्योतिःस्वरूपाय नमो ज्योतिर्मयात्मने ।
नमो ज्योतिःप्रकाशाय सर्वोत्कृष्टात्मने नमः ।। ६४

ओं नमो ब्रह्मरूपाय नम ओंकारमूर्तये।
निर्विकल्पाय सत्याय शुद्धसत्त्वात्मने नमः ।। ६५
महद्ब्रह्म नमस्तेऽस्तु सत्यसंकल्पहेतवे।
नमः सृष्टिप्रकाशाय गुणसाम्याय ते नमः ।। ६६
ब्रह्मविष्णुमहेशाय नानावर्णात्मरूपिणे।
सदोदिताय शुद्धाय गुणातीताय ते नमः ।। ६७
नमः सहस्रनाम्ने च नमः सहस्ररूपिणे।
नमः सहस्रवक्त्राय सहस्राक्षाय ते नमः ।। ६८
केशवाय नमस्तुभ्यं नमो नारायणाय च।
माधवाय नमस्तेऽस्तु गोविन्दाय नमो नमः ।। ६९
श्रीविष्णवे नमस्तुभ्यं मधुसूदनरूपिणे।
त्रिविक्रमसुदीर्घाय वामनाय नमो नमः ।। ७०
श्रीधराय नमस्तुभ्यं हृषीकेशाय ते नमः।
नमस्ते पद्मनाभाय दामोदराय ते नमः ।। ७१
नमस्ते संकर्षणाय वासुदेवाय ते नमः।
प्रद्युम्नाय नमस्तेऽस्तु अनिरुद्धाय ते नमः ।। ७२
नमः पुरुषोत्तमायाधोक्षजाय ते नमो नमः।
नमस्ते नारसिंहाय अच्युताय नमो नमः ।। ७३
नमो जनार्दनायास्तूपेन्द्राय च नमो नमः।
श्रीहरये नमस्तुभ्यं श्रीकृष्णाय नमो नमः ।। ७४
नमः पंढरिनाथाय भीमातीरनिवासिने।
नमो ऋषिप्रसन्नाय वरदाय नमो नमः ।। ७५
इष्टिकारूढरूपाय समपादाय ते नमः।
कटिविन्यस्त हस्ताय मुखब्रह्मात्मने नमः ।। ७६

नमस्तीर्थस्वरूपाय क्षेत्ररूपात्मने नमः ।
नमोऽस्तु मूर्तिमूर्ताय त्रिमूर्तये नमो नमः ।। ७७
नमस्ते बिन्दुतीर्थाय नमोऽमृतेश्वराय च ।
नमः पुष्करतीर्थाय चन्द्रभागाय ते नमः ।। ७८
नमस्ते जानुदेवाय धीरावत्यै नमो नमः ।
नमस्ते पुंडरीकाय भीमरथ्यै नमो नमः ।। ७९
मुक्तिकेशप्रवराय वेणुवादात्मने नमः ।
नमस्तेऽनंतपादाय द्विपदाय नमो नमः ।। ८०
नमो गोवत्सपादाय गोपालाय नमो नमः ।
नमस्ते पद्मतीर्थाय नरनारायणात्मने ।। ८१
नमस्ते पितृतीर्थाय लक्ष्मीतीर्थाय ते नमः ।
नमोऽस्तु शंखचक्राय गदापद्माय ते नमः ।। ८२
नमोऽश्वत्थनृसिंहाय कुंडलाख्यस्वरूपिणे ।
नमस्ते क्षेत्रपालाय महालिंगाय ते नमः ।। ८३
नमस्ते रंगशालाय नमः कीर्तनरूपिणे ।
नमो रुक्मिणिनाथाय महामूर्त्यै नमो नमः ।। ८४
नमो वैकुंठनाथाय नमः क्षीराब्धिशायिने ।
सर्वब्रह्म नमस्तुभ्यमहंब्रह्मात्मने नमः ।। ८५
नमो नमो नमस्तुभ्यं नमस्तेऽस्तु नमो नमः ।
क्लीं श्रीं ओं ।
आद्यन्ते संपुटीकृत्य बीजैश्च प्राणवल्लभे ।। ८६
अष्टोत्तरशतं मंत्रान् हृदयं नमनैः सह ।
अनन्यैः कीर्तितं यैश्च तेषामाज्ञां वहाम्यहम् ।। ८७

यावन्यस्य यथा भावो यन्नामन्यासपूर्वकम्।
तावदेव हि विज्ञानं गदितं मदनुग्रहात्।। ८८

श्रीशंकर उवाच।

इत्युक्तं वासुदेवोक्तं गोप्या द्गोप्यतरं महत्।
नित्यं संकीर्तनं यस्य प्राप्तमुक्तिर्न संशयः।। ८९

इदं गुह्यं हि हृदयं विठ्ठलस्य महाद्भुतम्।
शृणुयाच्छ्रद्धया युक्तो वैकुंठे लभते रतिम्।। ९०

एवमुक्त्वा महादेवः पार्वतीमनुकंपया।
समाधिस्थोऽभवच्छंभुः सुस्मितः कमलाननः।। ९१

——श्रीभविष्योत्तरपुराणे पांडुरङ्गमाहात्म्य

## विठ्ठलस्तवराजः ।

ओं अस्य श्रीविठ्ठलस्तवराजस्तोत्रमहामन्त्रस्य भगवान् वेदव्यास ऋषिः अतिजगती छन्दः श्रीविठ्ठलः परमात्मा देवता। त्रिमूर्त्यात्मक इति बीजम्। सृष्टिसंरक्षणार्थ इति शक्तिः वरदाभयहस्त इति कीलकम्। मम सर्वाभीष्टफलसिद्ध्यर्थे जपे विनियोगः।

अथ न्यासः–

ओ नमो भगवते विठ्ठलाय अङ्गुष्ठाभ्यां नमः। ओं तत्वप्रकाशात्मने तर्जनीभ्यां नमः। ओं शङ्खचक्रगदाधरात्मने मध्यमाभ्यां नमः। ओं

सृष्टिसंरक्षणार्थाय अनामिकाभ्यां नमः । ओं त्रिमूर्त्यात्मकाय कनिष्ठिकाभ्यां नमः । ओं वरदाभयहस्ताय करतलकरपृष्ठाभ्यां नमः । एवं हृदयादिन्यासः । भूर्भुवस्सुवरोमिति दिग्बन्धः ।

ध्यानम्-

श्रीगुरुं विठ्ठलानन्दं परात्परजगत्प्रभुम् :
त्रैलोक्यव्यापकं देवं शुद्धमत्यन्तनिर्मलम् ।। १

नासाग्रेऽवस्थितं देवमाब्रह्मस्तम्बसंयुतम् ।
ऊर्णातन्तुनिभाकारं सूत्रज्ञं विठ्ठलं स्वयम् ।। २

गङ्गायमुनयोर्मध्ये त्रिकूटं रङ्गमन्दिरम् ।
ज्ञानं भीमरथीतीरं स्वदेवं पण्डरीपुरम् ।। ३

रुक्मिणीशक्तिहस्तेन क्रीडन्तं चललोचनम् ।
आज्ञाब्रह्मबिलान्तःस्थज्योतिर्मयस्वरूपकम् ।। ४

सहस्रदलपद्मस्थं सर्वाभरणभूषितम् ।
सर्वदेवसमुत्पन्नं ओमितिज्योतिरूपकम् ।। ५

समपर्वत ऊर्ध्वस्थं श्रोणित्रयसहस्रकम् ।
स्तम्भो मध्यं यथा स्थानं कलौ वेङ्कटनायकम् ।। ६

पीतवस्त्रपरीधानं तुलसीवनमालिनम् ।
शङ्खचक्रधरं देवं वरदाभयहस्तकम् ।। ७

ऊर्ध्वपुण्ड्रमयं देवं चित्राभरणभूषितम् ।
रत्नसिंहासनं देवं सुवर्णमुकुटोज्ज्वलम् ।। ८

रत्नकिङ्किणिकेयूरं रत्नमण्डपशोभितम् ।
पौण्ड्रं च पालिनं रङ्गं यदूनां कुलदीपकम् ।। ९

देवारिदैत्यदर्पघ्नं सर्वलोकैकनायकम् ।
ओं नमश्शान्तिरूपाय सर्वलोकैकसिद्धये ।। १०

सर्वदेवस्वरूपाय सर्वयन्त्रस्वरूपिणे ।
सर्वतन्त्रस्वरूपाय विठ्ठलाय नमो नमः ।। ११

परमन्त्रप्रणाशाय परयन्त्रनिवारिणे ।
परतन्त्रविनाशाय विठ्ठलाय नमो नमः ।। १२

परात्परस्वरूपाय परमात्मस्वरूपिणे ।
परब्रह्मस्वरूपाय विठ्ठलाय नमो नमः ।। १३

विश्वरूपस्वरूपाय विश्वव्यापिस्वरूपिणे ।
विश्वम्भरस्वमित्राय विठ्ठलाय नमो नमः ।। १४

परहंसस्वरूपाय सोहं हंसस्वरूपिणे ।
हंसमन्त्रस्वरूपाय विठ्ठलाय नमो नमः ।। १५

अनिर्वाच्यस्वरूपाय अखण्डब्रह्मरूपिणे ।
आत्मतत्वप्रकाशाय विठ्ठलाय नमो नमः ।। १६

क्षराक्षरस्वरूपाय अक्षराय स्वरूपिणे ।
ओङ्कारवाच्यरूपाय विठ्ठलाय नमो नमः ।। १७

बिन्दुनादकलातीतभिन्नदेहसमप्रभ ।
अभिन्नायैव विश्वाय विठ्ठलाय नमो नमः ।। १८

भीमातीरनिवासाय पण्डरीपुरवासिने ।
पाण्डुरङ्गप्रकाशाय विठ्ठलाय नमो नमः ।। १९

सर्वयोगार्थतत्वज्ञ सर्वभूतहिते रा ।
सर्वलोकहितार्थाय विठ्ठलाय नमो नमः ।। २०

य इदं पठते नित्यं त्रिसन्ध्यं स्तौति माधवम्।
सर्वयोगप्रदं नित्यं दीर्घमायुष्यवर्धनम्॥ २१

सर्वे ज्वरा विनश्यन्ति मुच्यते सर्वबन्धनात्।
आवर्तनसहस्रात्तु लभते वाञ्छितं फलम्॥ २२


य इदं परमं गुह्यं सर्वत्र न प्रकाशयेत्।
स ब्रह्मज्ञानमाप्नोति भुक्तिं मुक्तिं च विन्दति॥ २३

सर्वभूतप्रशमनं सर्वदुःखनिवारणम्।
सर्वापमृत्युशमनं सर्वराजवशीकरम्॥ २४
त्रिसन्ध्यं पठते भक्त्या निर्भयो भवति ध्रुवम्॥ २५

संग्रामे संकटे चैव विवादे शत्रुमध्यगे।
शृङ्खलाबन्धने चैव मुच्यते सर्वकिल्बिषात्॥ २६


राजद्वारे सभास्थाने सिंहव्याघ्रभयेषु च।
साधकस्तम्भने चैव सर्वत्र विजयी भवेत्॥ २७

(श्रीरुद्रपुराणे वामकेश्वरतन्त्रे)



ஹரே கிருஷ்ண ஹரே கிருஷ்ண கிருஷ்ண கிருஷ்ண ஹரே ஹரே

ஹரே ராம ஹரே ராம ராம ராம ஹரே ஹரே



**ஸ்ரீ பண்டரீநாதர் (விட்டோபா) பண்டரீபுரம்**